PavamAnasukta

# ॥ पवमानसूक्तम् ॥

( पुण्याहवाचनम् )

तैत्तिरीय संहिता । काण्डम् - ५, प्रपाठकः - ६, अनुवाकः - १
तैत्तिरीय ब्राह्मणम् । अष्टकम् - १, प्रश्नः - ४, अनुवाकः - ८

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः ।
स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
ॐ शान्तिश्शान्तिश्शान्तिः ।

ॐ ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शꣳ स्योना भवन्तु॥

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम् ।
मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शꣳ स्योना भवन्तु॥

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शꣳ स्योना भवन्तु॥

शिवेन मा चक्षुषा पश्यताऽऽपश्शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाꣳ अग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त॥

पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः ।
पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।
शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूꣳ रनु । यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा ।
ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु । वयꣳ स्याम पतयो रयीणाम् ।
वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयो भूः ।
द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ।
बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देवमन्मभिः ।
अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत ।
येनापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा । इदं ब्रम्ह पुनीमहे । यः पावमानीरध्येति ।
ऋषिभिस्सम्भृतꣳ रसम् । सर्वꣳ स पूतमश्नाति ।

स्व॒दि॒तं मा॑त॒रिश्व॑ना । पा॒व॒मा॒नीर्यो॑ अ॒ध्येति॑ ।
ऋषि॑भि॒स्सम्भृ॑त॒ꣳ रस॑म्᳚ । तस्मै॒ सर॑स्वती दुहे । क्षी॒रꣳ स॒र्पिर्मधू॑द॒कम् ॥
पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः । सु॒दुघा॒हि पय॑स्वतीः ।
ऋषि॑भि॒स्सम्भृ॑तो॒ रस॑ः । ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ᳚ हि॒तम् ।
पा॒व॒मा॒नीर्दि॑शन्तु नः । इ॒मं लो॒कमथो॑ अ॒मुम् ।
कामा॒न्थ्सम॑र्धयन्तु नः । दे॒वीर्दे॒वैः स॒माभृ॑ताः ।
पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः । सु॒दुघा॒हि घृ॑त॒श्चुत॑ः ।
ऋषि॑भि॒स्संभृ॑तो॒ रस॑ः । ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ᳚ हि॒तम् ।
येन॑ दे॒वाः प॒वित्रे॑ण । आ॒त्मान॑ं पु॒नते॒ सदा᳚ ।
तेन॑ स॒हस्र॑धारेण । पा॒व॒मा॒न्यः पु॑नन्तु मा ।
प्रा॒जा॒प॒त्यं प॒वित्र॑म्᳚ । श॒तोध्या॑मꣳ हि॒रणमय॑म्᳚ ।
तेन॑ ब्रह्म॒ विदो॑ व॒यम् । पू॒तं ब्रह्म॑ पुनीमहे ।
इन्द्र॑स्सुनी॒ती स॒हमा॑ पुनातु । सोम॑स्स्व॒स्त्या व॑रुणस्स॒मीच्या᳚ ।
यमो॒ रजा᳚ प्रमृ॒णाभि॑ः पुनातु मा । जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु । भूर्भुव॒स्सुव॑ः ।

ॐ तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं यज्ञप॑तये । दैवी᳚स्स्व॒स्तिर॑स्तु नः ।
स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शन्नो॑ अस्तु द्वि॒पदे᳚ । शं चतु॑ष्पदे ।
ॐ शान्ति॒श्शान्ति॒श्शान्ति॑ः ।

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

Please send corrections to sanskrit@cheerful.com
Last updated October 5, 2010
http://sanskritdocuments.org